नैर्ऋत्यै– भो अमृतलक्ष्मि इहागच्छ इह तिष्ठ ....पाद्यम् अर्घ्यम् .....पुष्पाणि समर्पयामि ॐ अमृतलक्ष्म्यै नमः ॥

पश्चिमे– भो कामलक्ष्मि इहागच्छ इह तिष्ठ .... पाद्यम् अर्घ्यम् ....पुष्पाणि समर्पयामि ॐ कामलक्ष्म्यै नमः ॥

वायव्ये– भो सत्यलक्ष्मि इहागच्छ इह तिष्ठ......पाद्यम् अर्घ्यम्....... पुष्पाणि सपर्मयामि ॐ सत्यलक्ष्म्यै नमः ॥

उत्तरे–भो भोगलक्ष्मि इहागच्छ इह तिष्ठ ....पाद्यम् अर्घ्यम् ....पुष्पाणि समर्पयामि ॐ भोगलक्ष्म्यै नमः ॥

ईशाने–भो योगलक्ष्मि इहागच्छ इह तिष्ठ....पाद्यम् अर्घ्यम् ...पुष्पाणि समर्पयामि ॐ योगलक्ष्म्यै नमः ॥

पूर्वादि क्रमले षोडश लक्ष्मीको पूजा गर्ने –

पूर्वे– भो सर्वलक्ष्मि इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत्त्वं सुस्थिरा भव सुप्रसन्ना भव पाद्यम् समर्पयामि सर्व लक्ष्म्यै नमः , अर्घ्यम् समर्पयामि सर्व लक्ष्म्यै नमः,पञ्चामृतम् समर्पयामि सर्वलक्ष्म्यै नमः, शुद्धोदक स्नानम् समर्पयामि सर्वलक्ष्म्यै नमः, इदं लेपनं चन्दनम्, सिन्दूरम्, अवीरचूर्णम्, अक्षतान्, यवान्, तिलान्, पुष्पाणि समर्पयामि ॐ सर्वलक्ष्म्यै नमः ॥ भनी चढाउने ॥ यस्तै किसिमबाट

आग्नेये – भो विश्वलक्ष्मि ..ॐ विश्वलक्ष्म्यै नमः ।

दक्षिणे– भो भुवनलक्ष्मि....ॐ भुवनलक्ष्म्यै नमः

नैर्ऋत्ये – भो राजलक्ष्मि...ॐ राजलक्ष्म्यै नमः

पश्चिमे- भो मण्डल लक्ष्मि..ॐ मण्डललक्ष्म्यै नमः
वायव्ये- भो गृहलक्ष्मि.....ॐ गृहलक्ष्म्यै नमः
उत्तरे- भो धनलक्ष्मि......ॐ धनलक्ष्म्यै नमः
ईशाने- भो धान्यलक्ष्मि.....ॐ धान्यलक्ष्म्यै नमः
पुनः पूर्वे-भो सन्तानलक्ष्मि...ॐ सन्तानलक्ष्म्यै नमः
आग्नेये- भो जयलक्ष्मि......ॐ जयलक्ष्म्यै नमः
दक्षिणे- भो खड्गलक्ष्मि....ॐ खड्गलक्ष्म्यै नमः
नैर्ऋत्यै -भो बृद्धिलक्ष्मि.....ॐ बृद्धिलक्ष्म्यै नमः
पश्चिमे - भो धृतिलक्ष्मि.....ॐ धृतिलक्ष्म्यै नमः
वायव्ये -भो ज्ञानलक्ष्मि.....ॐ ज्ञानलक्ष्म्यै नमः
उत्तरे- भो मोक्षलक्ष्मि....ॐ मोक्षलक्ष्म्यै नमः
ईशाने- भो महालक्ष्मि.....ॐ महाँलक्ष्म्यै नमः
सबैलाई इहागच्छ इह तिष्ठ ....पाद्यम्, अर्घ्यम्...........
पुष्पम् समर्पयामि ॥ भनी षोडशोपचारले पूजा गर्ने ॥
ऐरावतको पूजा गर्ने मन्त्र-(त्यही थालिभित्र)

भो ऐरावत इह आगच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत्त्वम् सुस्थिरो भव सुप्रसन्नो भव ॥ आसनं समर्पयामि ऐरावताय नमः, पाद्यम् समर्पयामि ऐरावताय नमः, अर्घ्य जलम् समर्पयामि ऐरावताय नमः, आचमनीयम् समर्पयामि ऐरावताय नमः, पञ्चामृतम् समर्पयामि ऐरावताय नमः, शुद्धोदक

स्नानम् समर्पयामि ऐरावताय नमः, इदं लेपनं चन्दनं, सिन्दूरम्, अवीरचूर्णम्, अक्षतान्, यवान्, तिलान्, पुष्पाणि समर्पयामि ऐरावताय नमः ॥

ऐरावतलाई ध्यान गर्ने मन्त्र –

ऐरावत समारुढो वज्रपाणिः पुरन्दरः ।
शचीपतिश्च ध्यातब्यो नानाभरण भूषितः ॥
ध्यानम् समर्पयामि ऐरावत्नाय नमः ॥

इन्द्रको पूजा गर्ने –

भो इन्द्र इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत्त्वम् सुस्थिरो भव सुप्रसन्नो भव ॥ आसनम् समर्पयामि इन्द्राय नमः ॥ अब –पाद्यम् समर्पयामि इन्द्राय नमः, अर्घ्यजलम् समर्पयामि इन्द्राय नमः, आचमनीयम् समर्पयामि इन्द्राय नमः, पञ्चामृतम् समर्पयामि इन्द्राय नमः, शुद्धोदक स्नानम् समर्पयामि इन्द्राय नमः, इदं लेपनं चन्दनं, सिन्दूरम्, अबीरचूर्णम्, अक्षतान्, यवान्, तिलान्, पुष्पाणि समर्पयामि इन्द्राय नमः ॥

प्रार्थना– (फूल अक्षता लिएर)

विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गायसहस्राक्षायते नमः ॥
प्रार्थनां समर्पयामि इन्द्राय नमः ॥ भनी चढाई दिने ।

कुवेरको पूजा गर्ने –

भो कुवेर इह आगच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव आसनम् समर्पयामि कुवेराय नमः, पाद्यम् समर्पयामि कुवेराय नमः, अर्घ्यजलम् समर्पयामि कुवेराय नमः, आचमनीयम् समर्पयामि कुवेराय नमः, पञ्चामृतम् समर्पयामि कुवेराय नमः, शुद्धोदक स्नानम् समर्पयामि कुवेराय नमः, इदं लेपनं चन्दनं, सिन्दूरम्, अवीरचूर्णम्, अक्षतान्, यवान्, तिलान्, पुष्पाणि समर्पयामि कुवेराय नमः ॥

प्रार्थना–(फूल अक्षता लिने)

धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादि संपदः ॥
प्रार्थनां समर्पयामि कुवेराय नमः ॥ भनी चढाई दिने ।

चन्द्रमाको पूजा गर्ने –

भो षोडश कलात्मक चन्द्र इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव ॥ आसनम् समर्पयामि चन्द्रमसे नमः, पाद्यम् समर्पयामि चन्द्रमसे नमः, अर्घ्यजलं समर्पयामि चन्द्रमसे नमः, आचमनीयम् समर्पयामि चन्द्रमसे नमः,

पञ्चामृतं समर्पयामि चन्द्रमसे नमः, शुद्धोदक स्नानम् समर्पयामि चन्द्रमसे नमः, इदं लेपनं चन्दनम्, सिन्दूरम्, अवीर चूर्णम्, अक्षतान्, यवान्, तिलान्, करवीरपुष्पम्, विविध पुष्पाणि समर्पयामि चन्द्रमसे नमः ॥

प्रार्थना–(फूल अक्षता लिने)

नमस्तेतु निशानाथ लक्ष्मीभ्रातर्नमोस्तुते ।
व्रतं सम्पूर्णतां यातु त्वत्प्रसादात् निशापते ॥

प्रार्थनां समर्पयामि षोडश कलात्मने चन्द्राय नमः ॥

धूप बत्ति गर्ने–पहिले धूप डोलाउने मन्त्र–

ॐ गन्धसारसमुद्भूतं कस्तूर्या ऽऽ मोदसंभवम् ।
सुरासुरनराऽनन्दं धूपं देवि गृहाण मे ॥

धूपम् आघ्रापयामि महालक्ष्म्यादि सर्वेभ्यः पूजित देवेभ्यो नमः ॥

बत्ति वालि डोलाउने मन्त्र –

मार्तण्ड मण्डलाखण्ड चन्द्रविम्वाग्नितेजसम् ।
गृहाण देवि दीपंमे निर्मितंतव भक्तितः ॥

दीपं दर्शयामि ॐ महालक्ष्म्यादि सर्वेभ्यः पूजित देवेभ्यो नमः ॥

नैवेद्य चढाउने मन्त्र–(क्रमैले, पायस, लड्डु, रोटीहरू मिठाईहरू चढाउने)

इदं ब्रह्ममयं दिव्यं नैवेद्यं विविधम् शुभम्
मयां निवेदितं भक्त्या ईप्सितं देवि देहि मे ॥
ॐ देवतालयपाताल भूतलाधारधान्यजम् ।
षोडशाकारसंभारं नैवेद्यं ते नमः सदा ॥
इमानि पक्वान्न, मिष्ठान्नादि नैवेद्यानि समर्पयामि
ॐ महालक्ष्म्यै नमः ॥

आचमनीयं जल चढाउने मन्त्र –

ॐ स्नानादिकं विधायापि यतः शुद्धिः प्रजायते ।
एतदाचमनीयं च महालक्ष्मी विधीयताम् ॥
आचमनीयम् समर्पयामि ॐ महालक्ष्म्यै नमः ॥

नरिवलको जल, फलफूलहरू चढाउने मन्त्र –

यद्दत्तं परयाभक्त्या फलमूलादिकं मया ।
तेनमे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
नारिकेल जलं फलं समर्पयामि ॐ महालक्ष्म्यै नमः ॥

करोद्वर्तन निमित्त जल चढाउने मन्त्र– (श्रीखण्ड, चन्दन, कस्तूरी मिलाएको जल)

मलयाचल संभूतं कस्तूर्यां च समन्वितम् ।
करोद्वर्तनकं देवि गृहाण परमेश्वरि ॥
करोद्वर्तनं समर्पयामि ॐ महालक्ष्म्यै नमः ॥

पान मसला चढाउने मन्त्र –

पाताल तलसंभूतं वदनाम्भोजभूषणम् ।
मुखशोधन रूपेण ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि ॐ महालक्ष्म्यै नमः ॥

भेटी चढाउने मन्त्र –

हिरण्य गर्भगर्भस्थं हेमवीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छमे ॥
दक्षिणा द्रव्यं समर्पयामि ॐ महालक्ष्म्यै नमः ॥

चमर डोलाउने मन्त्र–

शशाङ्क करसंकाशहिमकर्पूरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥
चामरं बीजयामि ॐ महालक्ष्म्यै नमः ॥

पङ्खा हम्कने मन्त्र –

वर्हिवहं कृताकारं मध्यदण्ड सुशोभितम् ।
गृह्यतां व्यजनं देवि देह स्वेदापनुत्तये ॥
व्यजनं बीजयामि ॐ महालक्ष्म्यै नमः ॥

ऐना देखाउने मन्त्र–

दर्शनेन त्वमादर्श नूनं मङ्गलदायक ।
सौर्यसौभाग्य सत्कीर्ति निर्मल ज्ञानदो भव ॥
आदर्शं दर्शयामि ॐ महालक्ष्म्यै नमः ॥

आफूसँग भएको गहना सुन असर्फी चाँदी इत्यादि जे जे भए पनि त्यहीं राखेर पूजा गर्ने ।

जलले प्रदक्षिणा गर्ने –

काय वाङ्मानसं पापं यत्कृतं जन्मजन्मनि ।
तन्मे नाशय देवि त्वं प्रदक्षिण पदे पदे ॥
प्रदक्षिणां समर्पयामि ॐ महालक्ष्म्यै नमः ॥

अब जप गर्ने जप गरिसकेपछि जल चढाउने मन्त्र :-

गुह्यातिगुह्य गोप्त्रित्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धि र्भवन्तु मे देवि त्वत्प्रसादात् सुरेश्वरि ॥
जपं निवेदयामि महालक्ष्म्यै नमः । भनि जल चढाउने ॥

बत्ति कपूर बाली निराजन गर्ने – १६ बटा पाला अथवा खोरीमा पनि बत्ति तेल हाली पूजा गरिएको लक्ष्मीको वरिपरि राखी निराजन गर्ने बखतमा बाल्ने । अनि निराजन डोलाउने ।

ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
नीराजनं मया दत्तं गृहाण कमले रमे ॥
अन्धकारे स्थिता ये च ये च लोकविवर्जिताः ।
तेषां प्रकाशनार्थाय दीपमालां ददाम्यहम् ॥
नश्यन्तु विपदः सन्तु सम्पदश्च पदे पदे ।
शुभद सुखद चास्तु सुखरात्रि प्रसादतः ॥
नीराजनं दर्शयामि ॐ महालक्ष्म्यै नमः ।

पुष्पाञ्जलि लिएर प्रार्थना गर्ने मन्त्र –

क्षीरोदार्णवसंभूते कमले कमलालये।
प्रयच्छ सर्वकामान् मे विष्णुवक्षस्थलाश्रये॥
ऐरावतसमारुढा कमलासनसंस्थिता।
प्रसीद मम कार्येषु महालक्ष्मि नमोस्तुते॥
विश्वरूपस्य भार्याऽसि पद्मे पद्मालये शुभे।
महालक्ष्मी र्नमस्तुभ्यं सुखरात्रं कुरुष्व मे।
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्र प्रमावेण तन्मेऽलक्ष्मी र्व्यपोहतु॥
पुत्रा न्देहि धनं देहि देहि सौभाग्य मुत्तमम्।
कुरु श्रियं महालक्ष्मी ह्यलक्ष्मीं त्वाशु नाशय॥
नमस्ते सर्व देवानां वरदासि हरि प्रिये।
या गति स्त्वत्प्रपन्नानां सा मे भूयात्वदर्चनात्॥
सरसिजलिलये सरोजहस्ते,
धवलतरांऽशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे,
त्रिभूवन भूतिकरि प्रसीद मह्यम्॥
पुष्पाञ्जलिं समर्पयामि ॐ लक्ष्म्यै नमः॥

नमस्कार गर्ने मन्त्र –

ॐ विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाऽम्बरे।
लक्ष्मी देवि यथासि त्वं मयि नित्यं तथा भव॥

नमस्ते सर्वदेवानाम् वरदासि हरि प्रिये।
या गतिस्त्वत्प्रपन्नानां सामे भूयात् त्वदर्चनात् ॥
नमः कमलवासिन्यै नारायण्यै नमोनमः।
कृष्णप्रियायै सततं महालक्ष्म्यै नमोनमः ॥
पद्मपत्रेक्षणायै च पद्मस्थायै नमोनमः।
पद्मासनायै पद्मिन्यै वैष्णव्यै च नमोनमः ॥
सर्वसम्पत्स्वरूपिण्यै सर्वाराध्यै नमोनमः।
हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमोनमः ॥
कृष्णवक्षस्थितायै च कृष्णेशायै नमोनमः।
चन्द्रशोभास्वरूपायै रत्न पद्मेचशोभने ॥
सम्पत्यधिष्ठातृदेव्यै महादेव्यै नमोनमः।
नमोवृद्धिस्वरूपायै वृद्धिदायै नमोनमः ॥
नमस्कारं समर्पयामि ॐ लक्ष्म्यै नमः ॥

भोलिपल्ट विहान दीप कलश गणेश र महालक्ष्मीको साधारण पूजा धूप दीप नैवेद्य गरी पुष्पाञ्जली गर्ने अनि अर्घ निवेदन गर्दा भन्ने मन्त्र :-

न मे जन्मनि दौर्भाग्यं न मे जन्म दरिद्रता।
महालक्ष्मि नमस्तुभ्यं मर्घ्यं मे प्रतिगृह्यताम् ॥
अर्घ्यं निवेदयामि महालक्ष्म्यै नमः ॥

त्यसै गरि शङ्खको अर्घ्य पनि स्थापना गरेको भए निवेदन गर्ने ॥

पूर्ण पात्र गर्ने– पूर्णपात्रलाई पूजा गरी कुश; जौ, तिल, पानी लिई पूर्ण पात्र हातमा लिने –सङ्कल्प माथि बताए अनुसार–

हरिः ॐ तत्सत्...मम सम्म भनी दीपकलशगणेश पूजन पूर्वक महालक्ष्मी देवता पूजन कर्मणः साङ्गतासिद्ध्यर्थम् अन्नं प्रजापति दैवतम् यज्ञोपवीतम् ब्रह्म दैवतम् प्रचतिल द्रव्यं वनस्पति दैवतम् फलं वनस्पति दैवतम् इदं तण्डुल पूर्णपात्रम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय पूर्णपात्रत्वेन तुभ्यमहं संप्रददे तत्सन्नमम ॥

दक्षिणा सङ्कल्प–

दक्षिणालाई पूजा गरी कुश जौ तिल पानी लिई बोहतालाई हातमा लिने र सङ्कल्प माथि बताए अनुसार–

हरिः ॐ तत्सत् .....मम सम्म भनि अलक्ष्मी परिहारद्वारा महालक्ष्मी प्रसादतो धनधान्य सुखसमृद्धिप्राप्तिपूर्वक स्थिरलक्ष्मी कामनया कृतस्य दीप, कलश, गणेश पूजन पूर्वक महालक्ष्मी देवता पूजन कर्मणः सांगता सिध्यर्थम् इमां दक्षिणां रौप्यं चन्द्र दैवतं वा प्रचलित द्रव्यं वनस्पति दैवतं नाना नाम गोत्रेभ्यो ब्राह्मणेभ्यो ब्राह्मणीभ्यः कन्या कुमारीभ्यश्च यथा काले दातुं जले अहम् उत्सृजे ॥ भनी जलमा छुवाई भुइँमा राख्ने ॥

लक्ष्मीलाई विसर्जन नगर्ने खाली दीप कलश गणेशलाई मात्र विसर्जन गर्ने ॥

कायेन वाचा गर्ने–कर्म पात्रको कुश पानी लिने–

कायेन वाचा मनसेन्द्रियैवा,
बुध्यात्मनावा नुसृतेः स्वभावात् ॥
करोमि यद् यत् सकलं परस्मै ।
नारायणायेति समर्पयेतत् ॥

एतत्कर्म श्री कृष्णार्पण मस्तु भनी भैमा छाडि दिने ।

कलशको जलले सबैलाई अभिषेक गरिदिने मन्त्र–

ॐ द्यौः शान्तिरन्तरिक्ष ६ शान्तिः पृथिवी शान्ति रापः शान्ति रोषधयः शान्ति र्वनस्पतयः शान्ति र्विश्वेदेवाः शान्ति ब्र्रह्मशान्तिः सर्व ६ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥

ब्राह्मणले सपरिवारलाई प्रसाद लगाई दिदा भन्ने मन्त्र–

लक्ष्मीस्ते हृदि भारती च वदने मौलौसदा केशव ।
श्चण्डी ते भुजदण्डयोगुणनिधिगेहें कुवेरस्थितिः ॥
चित्ते धर्मरतिस्तवास्तु सततं दान प्रसङ्गः करे ।
सर्वास्ते विपदः प्रयान्तु विलयं त्वं दीर्घजीवी भव ॥

लक्ष्मी पूजा विधिः समाप्तः

लक्ष्मी व्रतकथा प्रारम्भः

स्कन्द उवाच –

येनेदं स्वीकृतं पूर्वं कथमस्मिन्प्रकाशितम् ।
ब्रूहि मे तत्वतो देव यद्यहं तव वल्लभः ।१।

शङ्कर उवाच–

आसीद्राजा सार्वभौमो मङ्गलार्ण इति श्रुतः ।
कुण्डिने नगरे रम्ये तस्य पद्मावती प्रिया ।२।
तमागतः कश्चिदेकः सेवको ब्राह्मणोत्तम ।
अज्ञातनाम्नस्तस्यासौं नाम चक्रे नृपस्तदा ।३।
तवल्लक इति ख्यातो वभूव द्विजसत्तमः ।
कदाचिन्मृगयासङ्गो भूपालो वनमाविशत् ।४।

श्रीस्कन्दजी शङ्कर भगवान्सङ्ग सोध्नु हुन्छ कि पहिले यो व्रत कसले गऱ्यो र कसरी यो संसारमा प्रकाश हुँदै आयो। हे देवदेव ! यदि म हजुरको प्रिय हुँ भने मलाई यो रहस्य बताइ वक्सियोस् ।।१।। शङ्कर भगवान् भन्नु हुन्छ। रम्य कुण्डिन नाम गरेको शहरमा चक्रवर्ती मङ्गलार्ण नाम गरेका राजा र पद्मावती नाम गरेकी रानी थिइन् ।।२।। ती राजाको नजिक एउटा अज्ञात अपरिचित ब्राह्मण सेवा गर्न आए ।।३।।

ती ब्राह्मणको नाम राजाले तवल्लक राखिबक्स्यो । केही समय पछि ती राजा शिकार खेल्न भनी वनमा गइबक्स्यो ॥४॥

तत्र विद्ध्वा वराहादीन् मृगान् हत्वा सहस्रशः ।
क्षुत्तृड्परिगतः शान्तो वृक्षमूलमुपाश्रितः ।५।
उदकान्वेषणे चारान्प्रेषयामास सर्वशः ।
वने जलन्तु नापश्यन् क्वचिद्भ्रान्त्या प्रयत्नतः ।६।
ते गत्वा नृपतिं प्रोचुर्नात्राम्भ इति दुःखिताः ।
तवल्लकोऽपि वभ्राम विपिनं तदतन्द्रितः ।७।
भ्रममाणःसरोऽपश्यत् कस्मिंश्चिद्वनगह्वरे ।
रम्यं मनोहरं दिव्यं कुमुदोत्पलमण्डितम् ।८।

त्यस वनमा राजाले हजारौ बदेंल र अनेक वन्य मृगलाई मारिबक्सियो र भोक प्यासले अत्यन्त दुःखित भएर एक रुखको फेदमा गई राज भयो ॥५॥ जल खोज्नको लागि अङ्गरक्षकहरू पठाइयो । तर अङ्गरक्षकहरूले वनमा जल खोज्न जादा कहिं पनि पाएनन् ॥६॥ ती सबै अङ्गरक्षक दुःखित भएर. राजा भए ठाउँमा आई भन्न लागे– महाराज ? यहाँ जल कहिं पनि भेटिएन । तवल्लक पनि परिश्रमसाथ सम्पूर्ण वनमा घुम्न थाले ॥७॥ तवल्लकले यताउता घुम्दै जाँदा घना वनमा कमलको फूलले शुशोभित रम्य सरोवर देखे ॥८॥

तत्रापश्यद्देवकन्या दिव्यरूपा मनोरमाः ।
चार्वङ्गीश्चारुनयना पीनोन्नतपयोधराः ।९।
हारकङ्कणकेयूरनूपुरालङ्कृताः शुभाः ।
पूजयन्तीर्महालक्ष्मीं व्रतरूपेण सादरात् ।१०।
तवल्लकोऽपि पप्रच्छ किमिदं कथ्यतामिति ।

स्त्रियः ऊचु ।

महालक्ष्मीव्रतमिदं सर्वकामफलप्रदम् ।११।
क्रियतेऽस्माभिरेकाग्रमनोभिस्तत्रभक्तितः ।
तवल्लकोऽपि तच्छ्रुत्वा व्रतं जग्राह भक्तिमान् ।१२।
तदनुज्ञां गृहीत्वास्य जलमादाय सत्वरम् ।१३।

त्यही तलाउमा दिव्यरूप मनलाई जित्ने भएका, जसका शरीर र आँखा सुन्दर र स्तन मोटा र उठेका छन् यस्ता देवकन्याहरूलाई देखे॥९॥ हार, कङ्कण, बाजु, घुघरु आदिले शुशोभित ती देवकन्याहरू आदर पूर्वक महालक्ष्मीको व्रत पूजा गर्दै थिए ॥१०॥ तवल्लक त्यहाँ गएर ती देवकन्याहरूसङ्ग सोधे कि यहाँहरू के गर्दै हुनुहुन्छ मलाई भन्नुहोस् ती स्त्रीहरूले भने कि हामीहरूले मनले चिताएको सबै कामना पूर्ण गरिदिने महालक्ष्मीको व्रत गरेका हौं ॥११॥ यो सुनेर तवल्लकले पनि सो व्रत गरे र उनीहरूसित आज्ञा लिई जल लिएर चाँडै नै राजाको समीप आए ॥१३॥

आजगाम जलं तस्मै दत्वा प्राञ्जलिना सह ।
जलं पीत्वा नृपस्तस्य दृष्ट्वा वै डोरकं करे ।१४।
किमिदं डोरकं विद्वन् किं व्रतं कृतवानसि ।
राज्ञा पृष्टस्तवल्लोऽपि कथयामास तद्व्रतम् ।१५।
तच्छ्रुत्वा राजशार्दूलो व्रतं जग्राह भक्तिमान् ।
तवल्लकेन सहितो राजा स्वपुरमाययौ ।१६।
पद्मावती गृहं गत्वा तया रन्तुं गतस्सह ।
रममाणाय सादेवी तेन राज्ञा प्रियेण वै ।१७।
तं दृष्ट्वा डोरकं हस्ते कुपितात्यन्तकोपना ।
कया तु वञ्चितो राजन् कया बद्धं सूडोरकम् ।१८।

तवल्लकले ल्याएको जल अञ्जुलीद्वारा पान गरेर राजाले सोध्नु भयो कि यो डोरो भनेको के हो ? तिमीले कुन व्रत गरेका हौ ? यस किसिमबाट राजाले सोध्दा तवल्लक ब्राह्मणले उक्त व्रतको बारे सबै सविस्तार बताए ।।१५।। भक्तिमान् राजाले त्यो व्रतको नियम सुनेर आनन्द भई त्यो व्रत लिई तवल्लक सहित राजा आफ्नो राज्यमा फर्किए ।।१६।। राजा आफ्नो रानीका साथ विहार गर्न गए । आफ्नो प्यारो राजाका साथ विहार गर्दै जाँदा ।।१७।। रानीले डोरो राजाको हातमा देखेर बडा क्रोधित भइन् र भनिन् कि कुन स्त्रीले हजुरलाई भुलाएर हजुरको हातमा डोरो बाँधि दिई ।।१८।।

मावादीरन्यथा ह्येतल्लक्ष्मीव्रतमनुत्तमम्।
इत्युक्ता तु प्रियेणासौ हस्ते चिच्छेद डोरकम् ।१९।
ज्वालामालाकुले बह्नौ क्षिप्तवत्यतिकोपना।
हाहाकष्टमिदं पापं कृतं मूढतया त्वया ।२०।
इति निर्भत्स्य तां राजा तत्याज बनगह्वरे।
सा च हानिं ययौ पश्चात्तत्र हानिं ययौ नृपः ।२१।
महालक्ष्म्यपचारेण सारण्यं जलवर्जिते।
मृगमाणा वने तस्मिन्न काञ्चिद्गतिमाप्नुयात्।२२।
विचरन्ती वने तस्मिन् ऋषेः कस्यचिदाश्रमम्।
ददर्श मृगसङ्कीर्णं शान्तं कृष्णमृगान्वितम् ।२३।

राजाले भनिबक्स्यो कि यस्तो नभन। यो त महालक्ष्मीको उत्तम व्रत हो। त्यसैको यो डोरो हो। यस प्रकार भन्दा पनि त्यस डोरोलाई रानीले छिनालि दिईन ॥१९॥ अनि रिसले आगोमा हालि दिइन्। यो देखेर राजाले भनिबक्स्यो कि बडा दुःख लाग्यो किनकि अज्ञानले गर्दा तिमीले ठूलो पाप गर्‍यौ ॥२०॥ यस प्रकार राजाले रानीलाई माया नै नगरी त्यो ठूलो वनमा छाडि त्यागि दिये। रानी र राजा दुबैलाई हानि भयो ॥२१॥ रानीले महालक्ष्मीलाई अनादर गरेको कारण जल नभएको ठूलो वनमा घुम्दै हिड्न थालिन् तर कुनै गति प्राप्त हुन सकेन ॥२२॥ त्यो घना वनमा घुम्दा रानीले मृग र कृष्ण मृगले युक्त भएर रहेको कुनै ऋषिको आश्रम देखिन् ॥२३॥

तत्रापश्यद्वने रम्यं वसिष्ठं मुनिपुङ्गवम् ।
ववन्दे चरणौ तस्य विसंज्ञा दुःखकर्शिता ।२४।
चिरंध्यात्वा मुनिस्तस्या ज्ञानवान् दुःखकारणम् ।
महालक्ष्म्यपचारेण ज्ञातं विज्ञानचक्षुषा ।२५।
तद्व्रतं कारयामास तस्या दुःखोपशान्तये ।
तद्दुःखं तत्क्षणंदेव विनष्टमभवत्तदा ।२६।
पुनश्च मृगयासक्तो भूपालो वनमाविशत् ।
कञ्चिन् मृगं समाविध्य वाणेनैकेन बाहुमान् ।२७।
अन्वगच्छन्मृगपदं तस्यां भुवि समागतः ।
वरं मुनिं ददर्शाग्रे वसिष्ठं बीतकल्मषम् ।२८।

त्यही आनन्दी ठाउँमा मुनिहरूमा श्रेष्ठ वसिष्ठ मुनिलाई देखिन् । दुःखले दुर्वल तथा होस हराएको रानीले मुनिको चरणमा ढोगि दिइन् ॥२४॥ धेरै वेरसम्म मुनिले सोचिकन उनको दुःखको कारण दिव्यचक्षुद्वारा विचार गरि पत्ता लगाए कि महालक्ष्मीको अनादर गर्नाले यस्तो दुःख पाएकी हुन् ॥२५॥ ती रानीको दुःख दूर गर्नाको लागि ऋषिले रानीलाई त्यही व्रत गराए । त्यस व्रतका प्रभावले तुरुन्तै उनको दुःख नाश भयो ॥२६॥ पछि कुनै समयमा राजा पनि शिकार खेल्दै खेल्दै वनमा हिडिरहेका र एउटा वाणले कुनै मृगलाई हाने ॥२७॥ वाण लागेर भागेको मृगको पछि पछि जादा आखिर त्यही ठाउँमा पुगे र पापले रहित मुनिवर वसिष्ठलाई देखे ॥२८॥

कृतातिथ्यक्रिथो दृष्ट्वा चरन्तीं बहिरन्तिकाम् ।
हावभावविभावाद्यैर्हरन्तीं हरिणेक्षणाम् ।२९।
मन्दां निर्गत्य नृपतिः प्रोवाच मधुरं वचः ।
वामोरु कासि कल्याणि किमर्थं चरसे वने ।३०।
किन्नरी मानुषी वा त्वं यक्षिणी चारुहासिनो ।
किमत्र बहुनोक्तेन भजमानं भजस्त्र माम् ।३१।
नृपेण तेन भक्त्योक्ता सस्मिता वाक्यमब्रवीत् ।
पुनर्भजामि चाहं त्वामवेहि महिषीं तव ।३२।
महालक्ष्म्यपचारेण त्वया हीना बसाम्यहम् ।
मुनीन्द्रस्याश्रमे रम्ये तरुगुल्मोपशोभिते ।३३।

राजाले शिष्टाचार पूर्वक त्यहाँ रहदा हाव भावबाट मनलाई हर्ने मृगनयनी बाहिर नजिकै घुम्दै गरेको देखे ॥२९॥

विस्तारै राजा बाहिर निक्ले र मीठो वचनले रानीसङ्ग बोले – हे बामोरु ! हे कल्याणि ! तिमी के कारणले यस वनमा घुमिरहेछ्यौ ? ॥३०॥ तिमी कुनै किन्नरको स्त्री, मानुषी अथवा यक्षिणी हौं ? धेरै भन्नाले के हुने हो, तिमीलाई चाहिने व्यक्ति मलाई भज ॥३१॥ स्नेहपूर्वक राजाले यी वचन भन्नाले रानी हाँसेर राजालाई भनिन् कि फेरि हजुर कै भजन गरु म हजुर कै रानी हुँ ॥३२॥ महालक्ष्मीको अनादर गर्नाले हजुर सङ्ग अलग भएकी हुँ वृक्षले सोभित मुनिवरको उत्तम स्थानमा रहिरहेछु ॥३३॥

ममोपरि कृपाविष्टो महालक्ष्मी व्रतोत्तमम् ।
कारयामास विधिवत्सर्वविघ्नोपशान्तये ।३४।
यथोक्तं वचनं श्रुत्वा स चोत्फुल्लविलोचनः
ऋषेरनुज्ञामाधाय प्रियामादाय सत्वरम् ।३५।
हृष्टपुष्टजनैर्जुष्टं पताकाध्वजशोभितम् ।
प्रविवेश तया सार्द्धं सपौरैरभिवन्दितः ।३६।
महालक्ष्म्या व्रतं सम्यक् तया सह चकारह ।
भुक्त्वा सभोगान् विपुलान् पुत्रः पौत्रैः समावृतः ।३७।
भूपालः सार्वभौमोभूत्तवल्लोऽमात्यतां ययौ ।
महालक्ष्मी प्रसादेन सन्निधिस्सर्वसम्पदाम् ।३८।

ऋषिले म माथि ठूलो कृपा गरेर सबै दुःख नाश गराउनको लागि महालक्ष्मीको उत्तम व्रत मबाट विधिपूर्वक गराउनु भयो ॥३४॥ रानीको वचन सुनेर राजा अत्तीनै प्रसन्न हुनु भयो र ऋषिको आज्ञाले आफ्नो रानीलाई लिएर घर गए ॥३५॥ प्रसन्नचित राजाले जनता लस्कर र ध्वजा पतकाले शोभित नगरमा आफ्नो रानी सहित जनता समक्ष हात जोड्दै प्रवेश गर्नु भयो ॥३६॥ राजाले रानीका साथ भई विधिपूर्वक महालक्ष्मीको व्रत गरे र सम्पूर्ण भोगको भोग गरी छोरा नाती सहित भएर रहे ॥३७॥ राजा चाही चक्रवर्ती बन्नु भयो र तवल्लक उनका मन्त्री भए । महालक्ष्मीको प्रसन्नताले उनलाई सम्पूर्ण सम्पत्ति प्राप्त भयो ॥३४॥

एवं प्रभावा सा देवी नराणामिष्टदायिनी।
सर्वपापहरा चैव सर्वदुःखापहारिणी।३९।
एवं षोडशवर्षं तु कर्तव्यं व्रतमुत्तमम्।
या करिष्यति तां भक्त्या स्वयं सिद्धिरूपा सते।४०।
लोकपालाश्च पुष्णन्ति देवा इव मनोरथान्
नारी वा पुरुषः करिष्यति भुदा भक्त्या व्रतं यत्नतः।४१।
सेवान्तै हरिरुद्रपद्मजसुराः पुष्यन्ति तस्य श्रियम्।
तत्पादौ परिरञ्जयन्ति मनुजा मौलिप्रभामण्डलै॥
स्तस्मिन्नेव कुटुम्बिनी वसति सा लक्ष्मीः
स्वयं विष्णुना।४२।
सद्भक्त्या वाप्यभक्त्या वा कुर्वन्तं व्रतमुत्तमम्।
अन्तकाले स्वयं विष्णुः संसारात् परिरक्षति।४३।
य इदं श्रृणुयान्नित्यं श्रावयेद्वा समाहितः।
न संत्यजति तं लक्ष्मीः अलक्ष्मीर्न च कामयेत्।
सर्वपापविनिर्म्मुक्तः स्वर्गलोके महीयते।४४।

मनुष्यलाई राम्रो फल दिने, सबै पाप र दुःख हटाई दिने देवी यीनै हुन ॥ ३९ ॥ यस प्रकार सोह्र वर्षसम्म जो कुनै स्त्री त्यस उत्तमव्रत गर्दछिन उनलाई आठ सिद्धिले भज्दछन् ॥४०॥ र लोकपाल पनि देवता सरह उनको सबै मनोरथको पोषण गर्दछन् ॥४१॥ जो नारी या पुरुष भक्ति र विधिपूर्वक यस व्रत गर्दछन। उनलाई सम्पत्ति हरि, रुद्र,

ब्रह्मा र देवताहरूले पुष्ट गर्दछन् र सम्पूर्ण मनुष्यहरू पनि त्यस प्रति अनुरक्त भएर सेवा गर्ने हुन्छन् उसको घरमा विष्णु सहित लक्ष्मी बास गर्दछिन् ॥४२॥

जो कोही मनुष्य भक्ति या अभक्तिले व्रत गरे पनि, उसको अन्त्य अवस्थामा विष्णुले संसारबाट रक्षा गर्दछन् ॥४३॥ जसले यो कथा सुन्दछ या सुनाउँदछ उसलाई लक्ष्मीले कहिल्यै छोडदिनन् र अलक्ष्मी उसको कामना गर्दिनन्। सबै पापबाट छुटेर स्वर्ग प्राप्त गर्दछन् ॥४४॥

इति श्री स्कन्द पुराणे महालक्ष्मी वृतकथा समाप्तम ॥

खण्ड 'ग'

गोवर्धन पूजाविधि प्रारम्भः

कार्तिक शुक्ल परेवा गोवर्धन पूजा विधि

गोवर्धन पर्वतको पूजा गर्दा गाई वस्तुहरूलाई प्रशस्त घाँस प्राप्त हुन्छ भन्ने फल श्रुति छ सोअनुसार हुन्छ नै साथै भगवान् श्री कृष्ण पनि प्रसन्न हुनुहुन्छ। यस कारण कार्तिक शुक्ल प्रतिपदाको दिन प्रातः कालमा गृहस्थीहरूले चाडकै रूपमा गाईवस्तुको कल्याणका निमित्त आ–आफ्ना घरमा गोवरको गोवर्धन पर्वत बनाएर पूजा गर्ने प्रचलन छ। सक्नेले गोवर्धन पवर्तमा नै गएर पूजा गर्नु धेरै राम्रो छ। सो नभएमा आ–आफ्नो घरमा गोवर्धन पर्वत बनाएर गोपाल सहित तल लेखिए अनुसारको विधिले पूजा गर्नु पर्दछ। यस दिन विहान स्नान गरेर नित्यकर्म सकी टीका प्रसाद लगाएर स्त्री सहित भई निराजन गरी गोवर्धन पर्वतको पूजा गर्ने। यो पूजा द्वापर युगमा गोकुलमा भगवान् श्री कृष्णको जन्म भए पछि केही वर्ष हुँदा सदाझैँ इन्द्रराजको पूजा आराधना गर्न तयार गर्दा श्री कृष्णले सोधनी गरी सबै जानकारी हासिल गरी वहाँकै प्रेरणा अनुसार गोकुल निवासी सबैं जनता हर्ष र उल्लास साथ इन्द्रको पूजा गर्नुको बदला गोवर्धन पर्वतमा गई पूजा

अर्चना गर्दा इन्द्रराज रिसाई मुशलधार वर्षा गर्दा पनि श्री कृष्णको सहायताले गोवर्धन पर्वतको छाता बनाउदा कसैलाई केही नहुदा श्री कृष्ण साक्षात् नारायण अवतार हुनु भएको थाहा पाई त्यहाँ आई श्री इन्द्रले कृष्णसँग माफि मागेको र सो बेला देखि आजसम्म उक्त पर्वतको पूजा अर्चना तथा घरघरमा गोवर्धन पर्वत बनाई पूजा अर्चना गर्दै आएको हो।

पूजा विधि –

आफू पूर्वतर्फ फर्कि गोवर्धन पहाड बनाई दियो, कलश, गणेश स्थापना गरी आसनमा बसि आचमन गर्ने

चोखो वस्त्र लगाई पूजागर्ने स्थानमा आई आसनमा वसी फूल अक्षता लिएर आसन र पृथ्वीलाई छुने मन्त्र–

ॐ पृथिवी त्वयाधृतालोका देवि त्वं विष्णुना धृता।
त्वं च धारय मा नित्यं पवित्रं कुरु चासनम् ॥
आधारशक्ति कमलासनाय नमः, पृथिव्यै नमः ॥
भनी पृथ्वी र आसनको पूजा गर्ने छाडिदिने ॥

चन्दन (भष्म) निधारमा लगाउने मन्त्र–

चन्दनस्य महत्पुण्यं पवित्रं पापनाशनम्।
आपदं हरते नित्यं लक्ष्मीस्तिष्ठति सर्वदा ॥

हात धोई आचमन गर्ने मन्त्र–

ॐ अच्युताय नमः स्वाहा। ॐ केशवाय नमः स्वाहा। ॐ माधवाय नमः स्वाहा।

हात धुने मन्त्र— ॐ गोविन्दाय नमः स्वाहा ।

अब दियो बाल्ने मन्त्र—

ॐ स्थिरोभव वीड्वङ्गऽआशुर्भव वाज्न्यर्व्वन् ।

पृथुब्भव सुखदस्त्वमग्नेः पुरिषवाहणः ॥

कर्मपात्र बनाउने

कर्मपात्रमा पवित्र हाल्दा भन्ने मन्त्र —

ॐ पवित्रेस्थोव्वैष्णाव्यौसवितुर्वः प्रसवऽउत्पुना

म्यच्छिन्द्रेण पवित्रेण सूर्यस्यरश्मिभिः ॥

देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञन्न

यताग्रेयज्ञ पतिᳬ सुधातुँयज्ञपतिन्देवयुवम् ॥

जल हाल्दा भन्ने मन्त्र —

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये ।

संय्योरभिस्रवन्तु नः ॥

तिल हाल्दा भन्ने मन्त्र—

ॐ तिलोसिसोमदैवत्यो गोसवोदेव निर्मितः ।

प्रत्नमद्भिःपृक्तःस्वधया पितॄँल्लोकान् पृणाहि

नःस्वाहा ॥

जौ हाल्दा भन्ने मन्त्र–

ॐ यवोसियवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरि-क्षायत्वा पृथिव्यैत्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

फूल हाल्दा भन्ने मन्त्र –

श्रीश्चतेलक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूप मश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

चन्दन हाल्दा भन्ने मन्त्र–

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामिहोपह्वयेश्रियम् ॥

अक्षता हाल्ने मन्त्र–

ॐअक्षन्नमीमदन्तह्यवप्प्रियाऽ अधूषत ।
अस्तोषतस्वभानवोविप्रान विष्ठयामतियो-जान्विन्द्रतेहरी ॥

अब दाया हात घोप्ट्ये गरी बूढीऔला र साईलीऔलाले चलाउने मन्त्र-

ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम् ।
अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१॥

ॐ यदि दिवा यदि नक्तमेनाँ सि चकृमाव्वयम् ॥
व्वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ २ ॥
ॐ यदिजाग्रद्यदिस्वप्नऽएनाँ सि चकृमाव्ययम्।
सूर्योमा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥३॥

कर्मपात्रबाट तीन टुक्रा कुश लिई मार्जन गर्दा भन्ने मन्त्र–

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतो ऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरिकाक्षः पुनातु ३।
ॐ पुण्डरिकाक्षाय नमः ३ ॥

कर्मपात्रको कुशको टुक्रा र जौतिल लिई प्रतिज्ञा सङ्कल्प गर्ने

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ ॐ पुराण पुरुषोत्तमाय नमः अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयप्रराद्धें श्रीश्वेतबराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलौ कलियुगे प्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गत हिमवत्पर्वतैकनेपालदेशे गङ्गादेव्या उत्तरकोणे गण्डकीकौशिकीप्रदेशे श्रीमद्विष्णु

प्रजापतिक्षेत्रे तदन्तर्गत पाशुपतक्षेत्रे पशुपते अमुकदिग्भागे वाग्मत्यादि अमुकदिग्भागे इह पुण्य भूमौ अमुकपुण्य क्षेत्रे अमुकग्रामे वा नगरे षष्टि सम्वत् सराणां मध्ये अमुकनाम सम्वत्सरे श्रीसूर्ये अमुकायने अमुकऋतौ मासोत्तमे मासे अमुकमासे वा चान्द्रेण अमुकमासे सौरेण चान्द्रेण च अमुकमासे अमुकपक्षे अमुकवासरे अमुकपुण्यतिथौ अमुकनक्षत्रे अमुकयोगे अमुकवार लग्नकरण मुहूर्तान्वितायाम् अद्येह अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ अमुकरार्शिशिस्थिते चन्द्रमसि अन्येषु शेषेषु ग्रहेषु यथा- यथा स्थानस्थितेषु सत्सु एवं ग्रहगण विशेषेणविशिष्टायाम् अद्येह अमुकगोत्रस्य अमुकप्रवरस्य (अमुकगोत्रा नाम्नी देवी) अहं मम श्रीकृष्ण प्रीतिद्वारा सकल पाप क्षय बहुधेनु प्राप्ति पूर्वक दीर्घायुः क्षेमादि सिध्यर्थं गोवर्धन सहित श्री गोपाल पूजन गोबृन्द पूजनञ्च अहं करिष्ये । भनी छाडि दिने ॥

(क) शंखको पूजा र प्रार्थना गर्ने मन्त्र–

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।
नमन्ति सर्वदेवास्तु पाञ्चजन्य नमोस्तु ते ॥
ॐ शङ्खाय नमः ॥

(ख) घण्टको पूजा र प्रार्थना गर्ने मन्त्र—

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरुघण्टे महानादं देवतार्चनसन्निधौ ॥
ॐ घण्टायै नमः ॥

सर्सियुँ वरिपरि छर्ने मन्त्र-

अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाऽज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः प्रेतगुह्यकाः ॥
ये चात्र निवशन्त्यन्ये देवता भुवि संस्थिताः ॥

अर्घ स्थापना र पूजा गर्ने

आपः क्षीर कुशाग्राणि दध्यक्षततिलास्तथा ।
यवः सिद्धार्थकश्चैव ह्यष्टाङ्गोऽर्घ्यः प्रकीर्तितः ॥

जल, दूध, दूवो, कुशको टुक्रा, तिल जौ, चन्दन, अक्षता, फलफूल दहि सर्सियु, यी आदि हालेर अर्घ बनाईन्छ। पहिले भूमिमा **ॐ आधार शक्तये कमलासनाय नमः** भनी फूल, अक्षता चढाउने र त्रिकुटी राख्ने र त्यसमाथि अर्घ पात्र राखेर गाईको दूध, दही, जल, कुश, सर्स्यूँ, चन्दन, अक्षता, फूल, जौ तिल, दूवो, फल हालेर प्रार्थना गर्ने—

गङ्गे च यमुनेचैव गोदावरि सरस्वति ।
नर्मदे सिन्धोकावेरि जलेस्मिन् सन्निधिं कुरु ॥

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

यो मन्त्र पढेर गङ्गा यमुना आदि तीर्थको आवाहन गर्ने पूजा गर्ने । अङ्कुश मुद्रा बनाएर **ॐ गङ्गादितीर्थेभ्यो नमः ।** आवाहन गरी भन्ने ।

धर्मप्रद– ॐ दशकलात्मने वह्निमण्डलाय नमः ।

अर्थप्रद– ॐ द्वादशकलात्मने सूर्यमण्डलाय नमः ।

कामप्रद– ॐ षोडशकलात्मने चन्द्रमण्डलाय नमः ॥

धेनु मुद्रा देखाएर अमृत आवाहन गर्ने । मत्स्यमुद्रा बनाएर १० पटक प्रणव (ॐ) उच्चारण गर्ने । शङ्खमुद्रा, देखाउने र पूजागर्ने । त्यस अर्घको जलले आफूलाई सेचन गर्ने ।

अब शङ्खार्घको पनि पूजा गर्ने–

ॐ शङ्खादौ चन्द्र दैवत्यं कुक्षौ वरुण देवता ।
पृष्टे प्रजापतिश्चैवं तस्मात् शङ्खं प्रमूजयेत् ॥

दीप पूजा

पहिले फूल अक्षता लिएर छुने–

भो कर्मसाक्षिणे दीप नारायणाय नमः पूजितोसि क्षमस्व भनेर आवाहन गर्ने अनि– **पाद्यम् समर्पयामि** दीपनारायणाय नमः त्यस्तै गरी– **अर्घ्यम्, आचमनीयम्,**

पञ्चामृतम्, शुद्धोदकस्नानम्, इदम् लेपनं चन्दनम् , सिन्दूरम्, अबीरचूर्णम्, तिलान्, यवान्, अक्षतान्, पुष्पं समर्पयामि दीपनारायणाय नमः ॥ भन्ने र चढाउने ।

प्रार्थना –

नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥
ॐ शुभं भवतु कल्याणमारोग्यं धनसंपदः ।
मम दुःखविनाशाय दीपज्योतिर्नमोस्तु ते ॥

कलश पूजाः

फूल अक्षतालिई कलशको भूमिमा छुने–

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवींय्यच्छ पृथिवीन्दृ ꣳ हपृथिवीम्माहि ꣳ सीः ॥

धानमा छुने मन्त्र –

ॐ धान्यमसि धिनुहिदेवान्प्राणायत्वोदानायत्वा व्यानायत्वा ॥ दीर्घामनुप्प्रसितिमायुषे धान्देवो वः सविताहिरण्यपाणिः प्प्रतिगृब्भ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वामहीनाम्पयोसि ॥

कलशमा छुने मन्त्र –

ॐ आजिघ्रकलसम्महृयात्वा विशन्त्विन्दवः । पुनरूर्ज्जा निवर्तस्यसानः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशता द्रयि ः॥

कलशमा तीर्थको जल हाल्ने मन्त्र –

ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्ज्जनीस्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत सदनमासीद ॥

कलश भित्र सर्वौषधी हाल्ने मन्त्र –

ॐ याऽओषधीः पूर्वाजातादेवेब्भ्यस्त्रियुगम्पुरा ।
मनैनु बब्भ्रूणामह ँ शतन्धामानि सप्त च ॥

अब पञ्चरत्न हाल्ने मन्त्र –

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेकऽआसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषाव्विधेम ॥

फल हाल्ने मन्त्र –

ॐ याः फलानीर्य्याऽअफलाऽअपुष्पा याश्चपुष्पिणीः ।
बृहस्पतिप्रसूतास्तानोमुञ्चन्त्व ँ हसः ॥

चन्दन हाल्ने मन्त्र –

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

जौ हाल्ने मन्त्र –

ॐ ओषधयः समवदन्त सोमेन सहराज्ञा ॥
यस्मैकृणोति ब्राह्मणस्त ६ राजन्पारयामसि ॥

दुवो हाल्ने मन्त्र –

काण्डात्काण्डात् परोहन्ती परुषः परुषस्प्परि ।
एवानो दूर्ब्बे प्रतनु सहस्रेण शतेन च ॥

सात ठाँउको माटो हाल्ने मन्त्र –

ॐ स्योनापृथिवीनोभवानृक्षरा निवेशनी ।
यच्छानः शर्म्म सम्प्रथाः ।

पञ्चपल्लव हाल्ने मन्त्र–

ॐ अश्वत्थेवो निषदनम्पर्णेवो व्वसतिष्कृता ।
गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

वस्त्र चढाउनें मन्त्र –

ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु । यद्दीदयच्छवसऽ ऋतप्रजात तदस्मासु

द्रविणन्धेहि चित्रम्। उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतयेत्वा ॥

आँप चाँप पिपलको पात हाल्ने मन्त्र –

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन।

ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

कलशलाई आवाहन गरी पूजा गर्ने –

भो वरुण इह आगच्छ इह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव वरदोभव। पाद्यम्, अर्घ्यम् आचमनीयम् पञ्चामृतम् शुद्धोदकस्नानम्, इदमनुलेपनं चन्दनम्, सिन्दूरम्, अवीरचूर्णम् अक्षतान्, यवान्, तिलान्, पुष्पाणि, समर्पयामि वरुणाय नमः भो वरुण पूजितोसि क्षमस्व ॥

तीर्थहरूको आवाहान गर्ने मन्त्र–

सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः ।

आयान्तु यजमानस्य दुरित क्षयकारकाः ॥

पूजा– पाद्यम् समर्पयामि सकल तीर्थेभ्यो नमः, अर्घ्यम्, आाचमनीयम्, पञ्चामृतम्, शुद्धोदक स्नानम्, इदं लेपनं चन्दनम्, सिन्दूरम्, अवीर चूर्णम्, अक्षतान्, यवान् तिलान्, पुष्पाणि समर्पयामि सकल तीर्थेभ्यो नमः ॥ भनी पूजागर्ने ॥

कलशको मुखदेखि पिंध सम्म छुने मन्त्र –

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूलेत्वस्य स्थितोब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्त, सप्त- द्वीप वसुन्धराः ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिता ः ॥

कलशको फूल अक्षता लिएर प्रार्थना गर्ने–

ॐ देवदानवसम्वादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥
त्वयि तिष्ठन्ति भूतानि त्ययि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः ॥
आदित्या वसवोरुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥
त्वत्प्रसादादिमंयज्ञं कर्तुमीहेजलोद्भव ॥
सान्निध्यं कुरुदेवेश प्रसन्नो भव सर्वदा ॥

पुष्पान्जलिं समर्पयामि कलशाधिष्ठातृ सकल दवेभ्यो नमः ॥

कलशको मुखमा फूल अक्षता लिई प्रत्येक नामले पूजा गर्ने –

भो गणपत्यादि वनस्पत्यन्त देवता इहागच्छत इहतिष्ठत यावत्पूजां करोमि तावत् यूयं सुस्थिरा भवत,

ॐगणपतयेनमः, ॐदेव्यैनमः (यस्तै किसिमबाट देवता सबैको नाम पछि नमः भनी पूजा गर्ने) ॐ शिवाय नमः, ॐ विष्णावे नमः, ॐ विनायकाय नमः, ॐ दुर्गायै नमः, ॐ वायवे नमः, ॐ आकाशानमः, ॐ अश्विनिकुमाराभ्यां नमः, ॐ सूर्याय नमः, ॐ सोमाय नमः, ॐ भौमाय नमः, ॐ बुधाय नमः, ॐ बृहस्पतये नमः, ॐ शुक्राय नमः, ॐ शनैश्चराय नमः, ॐ राहवे नमः, ॐ केतवे नमः, ॐ ईश्वराय नम, ॐ स्कन्दाय नमः, ॐ हरये नमः, ॐ ब्रह्मणे नमः, ॐ इन्द्राय नमः,ॐ यमाय नमः, ॐ कालाय नमः, ॐ चित्रगुप्ताय नमः,ॐ अग्नये नमः, ॐ भूम्यै नमः, ॐ विष्णावे नमः, ॐ इन्द्राण्यै नमः, ॐ प्रजापतये नमः, ॐ सर्पेभ्यो नमः, ॐ अनन्ताय नमः, ॐ ध्रुवाद्यष्टवसुभ्यो नमः, ॐ धात्रादिद्वादशादित्येभ्यो नमः, ॐ वीरभद्राद्येका–दशरुद्रेभ्यो नमः, ॐ गोर्यादिशोडशमातृभ्यो नमः, ॐआवाहादि सप्तमरुद्भ्यो नमः, ॐ विनायकाय नमः, ॐ ब्रह्मणे नमः, ॐ विष्णवे नमः, ॐ रुद्राय नमः, ॐ अर्काय नमः, ॐ वनस्पतये नमः, ॐ कुलदेवताभ्यो नमः, ॐ इष्टदेवताभ्यो नमः, ॐ स्थानीय देवताभ्यो नमः, ॐ सकल देवताभ्यो नमः इत्यादि ।

गणेश पूजा

कुश पानी लिई सङ्कल्प लिने–

पूर्व सङ्कल्प सिद्धिसस्तु अद्येह गोत्राया देव्याया अहं मम गोवर्धन पूजा कर्मणः फलप्राप्ति निमित्तक गोपाल गोविन्द देवता सहित पूजन निर्विघ्न समाप्ति निमित्तक श्रीगणेश पूजन महं करिस्ये।

फूल अक्षता लिई गणेशलाई छोई भन्ने–

भो गणपते इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव वरदो भव आसनम्, पाद्यम्, अर्घ्यम् आचमनीयम्, पञ्चामृतम्, शुद्धोदक स्नानम्, वस्त्रम्, यज्ञोपवीतम्, इदं लेपनं चन्दनम्, सिन्दूरम्, अवीर चूर्णम्, अक्षतान्, यवान्, तिलान्, रक्तपुष्पाणि, दूर्वाङ्कुरान्, फलम् मोदकम्, समर्पयामि श्री गणाधिपतये नमः, भो गणपते पूजितोसि क्षमस्व ॥

अब नरिवल अथवा अरू फल लिएर चढाउने मन्त्र–

ॐ रक्षरक्षगणाध्यक्ष परक्षत्रैलोक्यरक्षक।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्।
द्वैमातुर कृपासिन्धो षाण्मातुर जगत्प्रभो ॥
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद।

अनेने फलदानेन फलदाऽस्तु सदा मम ॥

फलं समर्पयामि गुरु गणाधिपतये नमः ॥

प्रार्थना –

यं ब्रह्म वेदान्तविदो वदन्ति, परं प्रधानं पुरुषं तथान्ये।

विश्वोद्भव कारणमीश्वराय, तस्मै नमो विघ्नविनाशकाय ॥

वक्रतुण्डमहाकाय कोटिसूर्यसमप्रभ ।

अविघ्नंकुरुमे देवसर्वकार्येषु सर्वदा ।

पुष्पान्जलिं समर्पयामि गणाधिपाय नमः ॥

अब दूवो र अक्षता लिई तलको नामै पिच्छे चढाउने–

ॐ गणाधिपतये नमः । ॐउमापुत्राय नमः ।

ॐ अघनाशाय नमः । ॐ एकदन्ताय नमः ।

ॐ इभवक्त्राय नमः । ॐ मुषकबाहनाय नमः ।

ॐ विनायकाय नमः । ॐ ईशपुत्राय नमः ।

ॐ सिद्धिप्रदाय नमः । ॐ कुमारगुरवे नमः ।

भनी पूजा गरी यज्ञोपवीत, वस्त्र, धूप दीप नैवेद्य भेटी चढाउने ।

गोवर्धन सहित गोपाललाई आवाहन गर्ने मन्त्र –

बलिराज्ञो द्वारपालो भवानद्य भवप्रभो ।

निज वाक्यार्थ सिध्यर्थं सगोवर्धन गोपते ।

आवाहनं समर्पयामि गोवर्धन सहित गोपालाय नमः ॥

कुशको टुक्रा लिई– **आसनं समर्पयामि गोवर्धन सहित गोपालाय नमः ॥** भनी आसनदिने, त्यस्तै– **पाद्यम्, अर्घ्यंम्, आचमनीयम्, पञ्चामृतं, शुद्धोदकस्नानं, वस्त्रं, यज्ञोपवीतम्, चन्दनम्, अवीरचूर्णम्, अक्षतान्, यवान् तिलान्, पुष्पाणि, माल्यार्पणं समर्पयामि गोवर्धन सहित गोपालाय नमः ॥** भनी पूजागरि धूप दीप, नैवेद्य, भेटी, चढाउने ।

पुष्पाञ्जलि गर्ने मन्त्र –

गोवर्धन धराधार गोकुलत्राणकारक ।
बहुवाहुकृतच्छाय गवां कोटिप्रदो भव ॥
पुष्पाञ्जलिं समर्पयामि गोवर्धन सहित गोपालाय नमः ॥

ब्राह्मण मित्रजनहरूलाई दक्षिणा भोजन गराउने । गरीब र कुकुरलाई भोजन, गाईलाई जौको पिठो मिसिएको भोजन ॥ पर्वतलाई बलि दिने (वोहोतामा पायस राखेर बत्तिवाली गोवर्धन पर्वतमा राखि दिने) ॥

खण्ड 'घ'

गो पूजाविधि प्रारम्भः

गोपूजा र गाईको प्रार्थना

गाईलाई शरद ऋतुमा फूलेको फूल र फूल मालाले सिगार्ने । त्यस दिन गाई दुहुन र भारी बोकाउन निषेध गरिएको छ।

गाईलाई चामलको पिठोको र अवीरको छाप बनाई सिगारि दिने तेल सिङ्, खुर, शरीर आदिमा लगाई दिई जल, चन्दन, सिन्दूर, अवीर, अक्षता, जौ तिल, ऋतु अनुसारको फूल, माला आदिले सिगारी पाद्यम्, अर्घ्यंम्, आचमनीयं, पञ्चामृतं, शुद्धोदक स्नानम्, इदं लेपनं चन्दनम्, सिन्दूरम्, अवीरचूर्णम्, अक्षतान्, यवान् तिलान् पुष्पाणि समर्पयामि गवे नमः भनी पूजा गरी धूप, दीप, नैवेद्य, भेटी आदि गरी फूल अक्षता लिई गाईको प्रार्थना गर्ने मन्त्र –

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
यस्मात् तस्मात् शिवं मे स्यादिहलोके परत्रच॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥

हे कपिले ! हे रोहिणी ! तपाई सम्पूर्ण देवताहरूले पूज्निे तीर्थ र देवतास्वरूप हुनुहुन्छ। त्यसकारण मलाई शान्ति प्रदान गर्नु होस्। हे गो माता हजुरका अङ्गहरूमा विश्वका जति पनि देवताहरू छन् ती सबै र चौध भुवन पनि रहेका छन् अतः यस लोक र परलोकमा पनि मलाई कल्याण प्रदान गर्नु होस्॥ मेरो अगाडी पछाडि र हृदयमा गाईहरू रहुन् गाईको माझमा म वस्न पाऊँ।

बलिको पूजा गरी प्रार्थना गर्ने मन्त्र

बलिराज नमस्तुभ्यं दैत्यदानववन्दित।
इन्द्रशत्रोऽमराराते विष्णुसान्निध्यदो भव॥

दैत्य दानव पूजित हे बलिराजा तपाईलाई नमस्कार छ हे इन्द्रादि देवता विरोधी बलि महाराज मलाई विष्णुको नगिच पुऱ्याई दिनुहोस्।

खण्ड 'ङ'

भ्रातृ पूजाविधि प्रारम्भः

कार्तिक शुक्ल द्वितीया भाई टीका

कार्तिक शुक्ल द्वितीया भातृ पूजाको दिन दिदी बहिनीले दाजु भाईलाई पञ्चरङ्गी टीका, र मखमलीको माला लगाएर पूजा गर्नु पर्दछ भन्ने पद्मपुराणमा लेखेको छ।

टीका र मालाको सङ्केत यसप्रकार छ :

रातो- **मङ्गलसूचक,** सेतो- **शान्तिसूचक,**
पहेंलो- **दीर्घजीवीको सूचक,** नीलो- निरोगीको सूचक,
हरियो - **बुद्धिजीवीको सूचक,**

मखमलीको माला - कुनै समयमा मलिन र निस्तेज नभै सदा एकै नास उज्जल तेजिलो होस् दीर्घायु होस भन्ने कामनागरी मखमलीको माला लगाईदिने चलन छ।

भ्रातृ पूजा विधि

आसनमा बसी दियो बाली आचमन गरी लक्ष्मी पूजा आदिमा दिएकोक छ। पृथ्वी र आसनको पृथ्वी **त्वया ....** मन्त्रले पूजा गरी माथि बताए अनुसार कर्मपात्र

बनाई पूजा गर्ने र कुशको तीन टुक्रा लिई माथि बताए अनुसार अपवित्रः .... मन्त्र पढी कर्मपात्र को जलले वरिपरि सबै तिर र आफूलाई पनि सेचन गर्ने र सोही कुश र जल लिई सङ्कल्प लिने–

हरिः ॐ तत्सत् .... माथि बताएको सङ्कल्प मम सम्म भनी परस्परं भ्रातृ भगिन्योः स्नेह ग्रन्थि सुदृढीकरणार्थम् आयुरारोग्यै श्वर्यादिप्राप्तिकामा भ्रातृ पूजन कर्माङ्गत्वेन दीप कलश- गणेश पूजन पूर्वकं यम–यमुना यमदूतानाम् अष्टचिरञ्जीवीनां च पूजनमहं करिष्ये ॥ भनी छाडि दिनु।

अर्घ स्थापना गरी दियो कलश गणेशको विधिमाथि पूजा आदिमा दिइएको छ सो अनुसार पूजा गरी धूप, दीप नैवेद्य, वस्त्र भेटी आदि चढाउने।

तामाको भाडाँमा अष्टदल लेखी त्यसको बीचमा यमलाई आवाहन गरी ध्यान गर्ने मन्त्र –

मेघश्यामं प्रसन्नास्यं नानालङ्कारसंयुतम्।
महिषस्थं दण्डधरं संस्तुतं पितृभिर्वृतम्।
नानारूपधरैर्दूतैः श्वेतवस्त्रं भजेद्यमम्॥
आवाहनं समर्पयामि यमाय नमः॥

भो यम इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव, सुप्रसन्नोभव, आसनम् पाद्यम्

अर्घ्यंम् पुनराचमनीयम् पञ्चामृतम् आचमनीयम् वस्त्रं यज्ञोपवीतम् चन्दनं सिन्दूरम् अवीर चूर्णम् अक्षतान् यवान् तिलान् पुष्पाणि समर्पयामि यमाय नमः ॥

यमको स्तुति गर्ने मन्त्र –

त्वमेव वैवस्वत विश्वमूर्ति, स्त्वमेव कालः करालान्तरात्मा।
त्वमेव मृत्यु पुरुषस्त्वमेव, प्रसीद देवेश नमो नमस्ते॥
धर्मराज नमस्तुभ्यं नमस्तेयमुना ग्रज।
पाहिमां किङ्करैः सार्द्धं सूर्यपुत्र नमोऽस्तु ते॥
स्तुतिं समर्पयामि यमाय नमः॥

भो यमुने इह आगच्छ इह तिष्ठ यावत् पूजाम् करोमि तावत् त्वं सुस्थिरा भव, सुप्रसन्ना भव, आसनम् पाद्यम्, अर्घ्यं पुनराचमनीयम् पञ्चामृतम् शुद्धोदक स्नानम् वस्त्रम् चन्दनम् सिन्दूरम् अवीरचूर्णम् अक्षतान् यवान् तिलान् पुष्पाणि समर्पयामि यमुनायै नमः ॥

प्रार्थना गर्ने मन्त्र –

यमस्वसर्नमस्तेस्तु सूर्यपुत्रि नमोऽस्तु ते।
लोकमातर्नमस्तेऽस्तु नमस्ते विष्णु वल्लभे॥
वरदा भव मे नित्यं यमुने लोकपूजिते।
प्रार्थनां समर्पयामि यमुनायै नमः॥

यमको दूतहरूको पनि यसै गरी थालीमा पूजा गर्ने –

भो यम दूताःइह आगच्छत इह तिष्ठत यावत् पूजां करोमि तावद्यूयं सुस्थिरा भवत सुप्रसन्ना भवत ।। भनी जल चन्दन आदि चढाई यमुनाको पूजा गरे ।

सरह गर्ने – पुष्पाणि समर्पयामि यम दूतेभ्यो नमः ॥

प्रार्थना गर्ने मन्त्र –

नमोऽस्तु यमदूतेभ्यो बलिनां ये महाबलाः ।
मनोनिलाक्रान्तवेगाः पाशमुद्गरधारिणः ॥
मम सौख्यकराः सन्तु पीडयन्तु न मां क्वचित् ।
ममाऽपचरितं सर्वं विस्मरन्तु दयालवः ॥
प्रार्थनां समर्पयामि यमदूतेभ्यो नमः ॥

यमुनाको परिचारिकाको पूजा गर्ने –

माथि यमुनाको पूजा गर्ने विधि अनुसार उक्त स्थाली मै भो यमुना परिचारिके इह आगच्छ इह तिष्ठ यावत् पूजाम् करोमि तावत्वं सुस्थिरा भव सुप्रसन्ना भव भनी आवाहन गरि पाद्यम् अर्घ्यं... पुष्पाणि समर्पयामि यमुना परिचारिकायै नमः । भनी पूजा गर्ने ॥

प्रार्थना गर्ने मन्त्र –

पूजयामि नमस्तुभ्यं यमुनापरिचारिकाम् ।
क्षमस्व मम कल्याणि यमुनापरिचारिके ॥
प्रार्थनां समर्पयामि यमुनापरिचारिकायै नमः ॥

सूर्यको पूजा गर्ने –

उक्त स्थालिमा बताए अनुसार सूर्यको पूजा–

भो सूर्य इह आगच्छ इह तिष्ठ यावत् पूजाम् करोमि तावत् त्वं सुस्थिरा भव, सुप्रसन्ना भव, आसनम् पाद्यम्, अर्घ्यं पुनराचमनीयम् पञ्चामृतम् शुद्धोदक स्नानम् वस्त्रम् चन्दनम् सिन्दूरम् अवीरचूर्णम् अक्षतान् यवान् तिलान् पुष्पाणि समर्पयामि सूर्याय नमः ॥ भनी पूजा गर्ने।

प्रार्थना गर्ने मन्त्र –

नमः सवित्रे जगदेकचक्षुषे, जगत्प्रसूतिस्थिति–नाशहेतवे। त्रयीमयाय त्रिगुणात्मधारिणे, विरिञ्चिना–रायणशङ्करात्मने ॥ प्रार्थनां समर्पयामि सूर्याय नमः ॥

अष्ट चिरञ्जीवीको पूजा पूर्वादि क्रमले –

अष्ट चिरञ्जीवीहरूको पूजा गर्ने क्रम–

पूर्वमा– व्यास, आग्नेयमा- परशुराम,
दक्षिणमा– अश्वत्थामा, नैर्ऋत्यमा– कृपाचार्य,
पश्चिममा– बलि, वायव्यमा- प्रल्हाद,
उत्तरमा– हनुमान्, ईशानमा- विभीषण,
वीचमा- मार्कण्डेय।

तसर्थ क्रमैले– भो व्यास इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो वरदो भव आसनम्, पाद्यम् अर्घ्यं ....माथि बताए अनुसार

पुष्पाणि आदि गर्ने यस्तै अरु सबैको यसै क्रमले पूजा गर्ने धूप दीप नैबेद्य भेटी नीराजन आदि गर्ने ।

अष्ट चिरंजीवीको सबैले प्रार्थना गर्ने मन्त्र –

मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
चिरञ्जीवी यथाऽसित्वं तथा मे भ्रातरं कुरु ॥१॥
बलिराज नमस्तुभ्यं नमस्ते विष्णुवल्लभ ।
भविष्येन्द्रसुराराते वरदो भव सर्वदा ॥२॥
अज्ञानतिमिरे मग्नं जगदज्ज्ञानैक चक्षुषा ।
उद्धृतं येन मुनिना तस्मै व्यासाय ते नमः ॥३॥
रामभक्तैक मुकुटरत्नज्योतिः स्वरूपिणे ।
भविष्यद् ब्रह्मणे तुभ्यं नमो हनुमते नमः ॥४॥
विभीषण नमस्तुभ्यं नमस्तेऽसुरसत्तम ।
रामभक्त नमस्तुभ्यं पाहिमां सर्वदाऽनघ ॥५॥
सप्तर्षिप्रवरं देवं वीरं विप्रस्वरूपिणम् ।
कृपं नमामि सततं वरदो भव सुव्रत ॥६॥
सर्वापकरणे शक्तं रामं शस्त्रभृतां वरम् ।
पितृचित्तानुगं विप्रं पूजयामि नमोऽस्तु ते ॥७॥
जटिलाः स्मश्रुला दक्षास्त्वग्धमन्यस्थिरूपिणः ।
ममपापहराः सन्तु सोमसूर्याग्निवर्चसः ॥८॥

अब दिदी बहिनीले तेल र पानीले घुमी दाजु भाईलाई जल चढाई टीका, माला, फूल दूबो आदि लगाई धूप दीप, नैवेद्य आदि गरी फूल अक्षता लिएर प्रार्थना गर्ने मन्त्र–

मार्कण्डेय नमस्तेऽस्तु नमस्ते महदायुषे।
चिरायुस्त्वं यथा लोके तथा भ्राता भवेन्मम ॥
आयुःप्रद महाभाग सोमवंशसमुद्भव।
महामते मुनिश्रेष्ठ मर्कण्डेय नमोऽस्तु ते ॥
यथाऽस्ति यमुना देवी यमेन भातृशालिनी।
तथा मे भ्रातरः सन्तु प्रति जन्मसु सुव्रताः ॥
भ्रातस्तवानुजाताहं भुंक्ष्व भोज्यमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
यत्प्राप्ता च यमुनया यमराजस्य पूजनात्।
तथा ममापि सकलं भवेज्जन्मनि जन्मनि ॥
आयुर्लक्ष्मीर्यशोधैर्यनिर्भयत्वमरोगिता।
वाक्पटुत्वमजाड्यञ्च जायतां मम सर्वदा ॥

अब जेठो क्रमले सबै दिदी बहिनीलाई पूजा गरी टीका, फूल माला लगाई दक्षिणा दिई फूल अक्षता दिई प्रार्थना गर्ने मन्त्र –

त्वं लक्ष्मीस्त्वमपर्णाऽसि ब्राह्मी त्वं च सरस्वती।
त्वत्पूजनात्भवेयुस्ताः पूजिता मम सर्वदा ॥

आयुर्लक्ष्मीर्धनं धान्यं पश्वादिकमरोगिता ।
सर्वं त्वदर्चनादाप्तं भवेज्जन्मनि जन्मनि ॥

अब अर्घ निवेदन र पूर्णपात्र गरी दक्षिणा दिई विसर्जन गर्ने मन्त्र–

यान्तुदेवगणाः सर्वे पूज़ामादाय मामिकाम् ।
इष्टकामप्रसिध्यर्थं पुनरागमनाय च ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मा स्थितो विष्णु स्वस्थानं परमेश्वर ।
हावाहनं नजानामि नजानामि विसर्जनम् ।
मन्त्र पूजां नजानामि क्षमस्व परमेश्वर ॥

समाप्त

पुस्तक पाइने ठेगाना

१. नेशनल बुक सेण्टर, भोटाहिंटी, फोनः ४२२१२६९, ४२४२४०९
२. हरेक पुस्तक भण्डार, भोटाहिंटी, फोनः ४२५२९००
३. सुकुन्दा पुस्तक पसल, भोटाहिंटी, फोनः ४२२०३७९
४. सफलता पुस्तक भण्डार भोटाहिंटी, फोनः ४२२०६०४
५. समता बुक्स एण्ड स्टेशनरी,भोटाहिटी, फोनः ४२२३७०६
६. रत्न पुस्तक भण्डार, भोटाहिटी, फोनः ४२४८९६३
७. श्री हिमालय बुक सेण्टर, बागवजार, फोनः ४२४२०८५
८. रत्न पुस्तक भण्डार माइतिघर, फोनः ४२४०८५०
९. दुर्गा पुस्तक भण्डार, देवपाटन, पशुपती, फोनः ४४६१११६
१०. श्री पशुपतिनाथ शरण सहकारी संस्था, देवपाटन, पशुपति
११. यूनिभर्सल एजुकेशनल सेन्टर, मङ्गलबजार, पाटन, फोनः ५५२१२१६
१२. जयगुरु बुक्स एण्ड स्टेशनरी, भोटाहिटी, फोनः ४२२२२१९
१३. सब वे बुकसेन्टर, भोटाहिटी, फोनः ४२१६०३३
१४. सूचना केन्द्र (पत्रिका पसल) हेटौडा, फोनः ०५७-५२१७३७
१५. हिमालय बुक हाउस, मणिपथ, बुटवल, फोनः ०७१-५४१००९
१६. धार्मिक पुस्तक पसल, नारायणघाट, फोनः ०५६-५३१६१५
१७. दैनिक संस्थान प्रतिष्ठान, विर्तामोड, झापा, फोनः ०२३-६९२२१८
१८. श्री शिवशक्ति धार्मिक पुस्तक एवं पूजन सामाग्री केन्द्र, कावासोती, नवलपरासी, मो. ९८४७२४१८०३
१९. ऋद्धिसिद्धि पूजा सामाग्री केन्द्र, विर्तामोड, झापा, मो. ९८४२६९७४२२
२०. पाञ्चायन पूजा सामाग्री पसल, दमक, झापा, मो. ९८५२६७८८८४
२१. गुरू पुस्तक पसल, भोटाहिटी, फोनः ४२३९२४२
२२. भोटाहिटी बुक्स, भोटाहिटी
२३. पूजा सामाग्री भण्डार, महेन्द्रपुल, पोखरा, फोनः ०६१-५४१४५७
२४. हरेकष्ण पूजा सामाग्री भण्डार, जेसिसचोक, बुटवल, मो. ९८४७४७९२४२
२५. वैदिक पूजा सामाग्री भण्डार, पुतलीबजार, नारायणघाट, फोनः ०५६-५२०९०९
२६. भट्टराई पूजा सामाग्री भण्डार, पोखरा-१, वगर, मो. ९८५६०२६६४१
२७. बाबा पूजा सामाग्री भण्डार, तीन पैनीचोक, विराटनगर, मो. ९८४२२९८६५७

लेखकको परिचय

नाम: **मधुसूदन सुवेदी**

जन्म: बि.सं. २००० ललितपुर, सानेपा।

शिक्षा: बि.ए.,बि.लिब. एस्सी एण्ड डिओसी।

सेवा : विभिन्न मन्त्रालय, विभाग, लोक सेवा आयोग, निर्देशक नेपाल राष्ट्रिय पुस्तकालय, संसद सचिवालय, सर्वोच्च अदालत, केन्द्रीय कानून पुस्तकालय आदीमा ५० वर्षको अनुभव।

संघसस्था: सङ्कट कालीन निवारण समिति, विश्व हिन्दू महासंघ, ढुंङ्गेधारा सत्संग भवन संरक्षण समिति, सानेपा, गीता अध्ययन मण्डल स्वयम्भू, ॐ सत्सङ्ग भवन जावलाखेल, आत्मालोक सन्यास आश्रम, वागडोल, सानेपा स्वास्थ्य चौकी, अन्तर्राष्ट्रिय ब्राह्मण संघ, भारद्वाज संस्कृति सम्बर्धन केन्द्र आदि।

कृति: हिन्दू सदाचार पद्धति, पुस्तकालय विज्ञानको उपादेयता, शारदीय दुर्गापूजा विधि, स्व.स.से.ऋषी सुवेदीको सम्झनामा शोक काव्य, सरलीकृत सत्यनारायण पूजा विधि, सरलीकृत लक्ष्मी पूजा विधि, सरलीकृत महालक्ष्मी पूजाबिधि, सरलीकृत अन्त्यपद्धति, सरलीकृत मार्कण्डेयाद्यष्ट चिरंजीवि पूजाविधि, नव ग्रहादि पाठ सहित, **Fundamentals of Library & Information Science on Nepales Response,** हिन्दू विवाहको इतिहास, सनातन हिन्दू धर्म तथा संस्कार, सरलीकृत अग्निस्थापना विधि, सरलीकृत शिलान्यास बिधि, सनातन दैनिक पूजाविधि तथा वार्षिक पर्व निर्देशिका, **Om Age Old Eternal Hindu Religion & Sacrament,** सरलीकृत स्वयम्वर पटलाञ्छन पूर्वाङ्गग्रहशान्ति सहित विवाह विधि, सरलीकृत ग्रहशान्त्यग्निस्थापन चूडोपनयन वेदारम्भ समावर्तन विधि, सरलीकृत हरितालिका र ऋषिपञ्चमी पूजाविधि, सम्पूर्ण एकादशी महात्म्य सरल पूजाविधि सहित, श्री गणेश सहस्रनाम पूजाविधि, सनातन विशेष चाडपर्व तथा धार्मिक लेख,श्रीपशुपतिनाथ र द्वादश ज्योतिर्लिङ्ग, शिवपूजाविधि सहित रूद्राष्ट्याध्यायी, तीर्थयात्रा संस्मरण, सरलीकृत पूर्णिमाव्रत चन्द्रमापूजाविधि, सरलीकृत मासिक श्राद्ध पद्धति, **History of the Aryan Marriage a Sacrament,** श्री स्वस्थानी व्रतकथा, सरल पूजाविधि सहित स्तोत्र पुष्पाञ्जली, आशौचनिर्णय, गरूड पुराण, नारायणबलि प्रयोग, श्री कृष्ण जन्माष्टमी, अदुःख नवमी आदि।

भ्रमण: भारत, श्रीलंका, थाईलैण्ड, हङ्कङ्क, चीन।